[९००] विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम् । (म. भा. ३. ३८०)

पचन्ति पूतिः, पचन्ति पूतिः । प्रपचन्ति पूतिः, प्रपचन्ति पूतिः ।

सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम् ।
पूतिश्च चानुबन्धो [1]विभाषितं चापि बह्वर्थम् ॥ (म. भा. ३. ३८०)

## गतिर्गतौ । (७०/३९७७)

गतिः गतौ परतः अनुदात्तो भवति । अभ्युद्धरति । [2]समुदानयति । अभिसम्पर्याहरति । गतिः इति किम् ? देवदत्तः प्रपचति । गतौ इति किम् ? 'आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः' (ऋ. ३. ४५. १)। याहि इत्येतत् प्रति क्रियायोगादाङित्येष गतिः, तस्य गतौ इत्येतस्मिन्नसति गतिः [3]इत्यनाश्रित-परनिमित्तकमनुदात्तत्वं स्यात् ॥

## तिङि चोदात्तवति । (७१/३९७८)

[4]गतिः इति[5] वर्तते । [6]तिङन्ते उदात्तवति परतो गतिरनुदात्तो भवति । यत् प्रपचति । यत् प्रकरोति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् (म. भा. ३. ३८२) । अन्यथा हि यं प्रति गतिः, [7]तत्रानुदात्तो भवति इति धातौ एव उदात्तवति स्यात्, प्रत्यये न स्यात् [8]यत् प्रकरोति इति । 'यत्क्रियाप्रयुक्ताः [9]प्रादयस्तेषां तं प्रति गत्युप-सर्गसञ्ज्ञे भवतः' (जै. प. ९९) [10]इति [11]तिङन्ते धातुमेव प्रति गतिसञ्ज्ञा । आमन्ते तर्हि न प्राप्नोति, प्रपचतितराम्, प्रपचतितमाम् इति ? अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति । तेषा[12]मव्ययपूर्वपदप्रकृतिस्वरत्वे सत्यक्रियमाणेऽपि तिङ्-ग्रहणे परमनुदात्तवद् भवतिइति [13]गतिनिघातो नैव सिध्यति । अथ [14]तरबन्तस्य गतिसमासः? एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेः 'अनुदात्तं पदमेकवर्जम्' (६. १. १५८/३६५०) इत्येवानुदात्तत्वं सिद्धम् । येषां 'गतिकार-कोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः' (पु. प. ६२) इत्यनेन [15]वचनेन कृदन्तेनैव प्राक् सुबुत्पत्तेः समासो भवति, नान्येन[16], इति दर्शनम्, तेषामे[17]वंविधे विषये[18]समासेन नैव भवितव्यम् इति । पृथक् स्वरप्रवृत्तौ सत्याममनेन [19]निघातेन प्रयोजनमस्ति । तदर्थं यत्नः कर्तव्यः । उदात्तवति इति किम् ? प्रपचति । प्रकरोति ॥

## आमन्त्रितं पूर्वमविद्यमानवत् । (७२/४१२)

[20]आमन्त्रितं पूर्वमविद्यमानवद् भवति, तस्मिन् सति यत्कार्यं तन्न भवति, असति यत्[21] तद् भवति । कानि पुनरविद्यमानवत्त्वे प्रयोजनानि । आमन्त्रिततिङनिघातयुष्मदस्मदादेशाभावाः । देवदत्त, यज्ञदत्त [22]इत्यत्र आमन्त्रि-तस्य पदात् परस्य (८. १. १९/३६५४) इति निघातो न भवति । षाष्टिकामन्त्रिताद्युदात्तत्वं (६. १. १९८/३६५३) भवति । देवदत्त पचसि इत्यत्र 'तिङङतिङः' (८. १. २८/३९३५) इति निघातो न भवति । देवदत्त

1. विभाषितश्च क. 2. समुदा नास्ति ब, समुदाहरति क. ड. इ, उदानयति तै. ब्रा. 1. 6. 5. 3. 3. इत्यवाश्रितं इ, असत्याश्रित ह. 4. वाक्यमिदं नास्ति इ. 5. च इत्यधिकम् ह. 6. तिङन्ते नास्ति ह. 7. तत्र उदात्तो भवति क, उदात्तवति गतिर्भवति ड. इ, गतिसूत्रोदात्तवति ह. 8. यत् प्रपचति । प्रत्ययेऽनुदात्तं प्रति न प्राप्नोति क. 9. प्रादयः नास्ति इ. 10. वाक्यमिदं नास्ति ब. 11. तिङन्ते नास्ति क. 12. अपूर्वपद ह. 13. गतिनिघाते क. 14. तरबन्तेन क.ड. 15. वचनेन नास्ति ह. 16. भवति इत्यधिकम् ह. 17. तिङविषये क. 18. समासेनैव क. इ. ह. 19. गतिविधानेन भवितव्यम् ब. क, गतिनिघातेन इ. 20. आमन्त्रितान्तं ब. क. इ. 21. कार्यम् इत्यधिकम् ब. क. इ. 22. अत्र नास्ति ब.